# Prabhat Kids School, Akola 2025-26

(CBSE Affiliation No. 1130426)

Std.VII Section : ____________ Subject : Sanskrit Marks : 80

Date : ______________ Term-I

Name :_________________________________________ Roll No. ____________ Time : 3 Hrs.

## खण्डः 'क'

## (अपठित अवबोधनम्)

**प्रश्न १ : अधोलिखितम् अपठितम् अनुच्छेदं पठित्वा उत्तराणि लिखत।** **१० अङ्काः**

अहो! रमणीया प्रातःकालस्य वेला। आकाशे खगाः कलरवं कुर्वन्ति। सूर्यः आकाशे उदयोन्मुखः अस्ति। वृद्धाः प्रबुद्धाः सन्ति। युवकाः प्रबुद्धाः सन्ति। युवतयः प्रबुद्धाः सन्ति। कृषकाः क्षेत्रं गच्छन्ति। बालाः विद्यालयं प्रति गच्छन्ति। सर्वे जनाः स्वकार्येषु मग्नाः सन्ति। मन्दः सुगन्धः पवनः वहति। सर्वत्र आनन्दमयम् वातावरणम् अस्ति। पुष्पाणि विकसन्ति। जनाः उद्यानेषु भ्रमन्ति। केचन् जनाः व्यायामं कुर्वन्ति। केचन् सूर्यं नमन्ति। सर्वे जनाः प्रसन्नाः स्फूर्तिवन्तः सन्ति। प्रातःकालस्य वेला सर्वेषु जनेषु नव-जीवनं संचरति। तपसाः आश्रमेषु यजन्ति। भक्ताः देवालयं गच्छन्ति। शिशवः विश्रामस्य पश्चात् प्रसन्नाः भवन्ति। मन्दिरेषु शंखनादः भवति। सरणिषु जनाः इतस्ततः आगच्छन्ति।

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(२ अङ्काः)**

१) भक्ताः कुत्र गच्छन्ति ?

२) प्रातःकाले मन्दिरेषु किम् भवति ?

३) सरणिषु के इतस्ततः आगच्छन्ति ?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** **(४ अङ्काः)**

१) प्रातःकालस्य वेला किं सञ्चरति ?

२) जनाः उद्यानेषु किम्-किम् कुर्वन्ति ?

३) सर्वे जनाः केषु मग्नाः सन्ति ?

**III) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नत्रयम्)** **(३ अङ्काः)**

१) 'जनेषु' इति पदे का विभक्तिः ?

क) द्वितीया ख) पञ्चमी ग) सप्तमी

२) 'सर्वत्र आन्दमयम् वातावरणम् अस्ति।' अस्मिन् वाक्ये अव्ययपदं किम् ?

क) वातावरणम् ख) सर्वत्र ग) अस्ति

३) 'नमन्ति' इति पदे कः धातुः ?

क) न ख) नम् ग) नम

४) 'जनाः व्यायामं कुर्वन्ति।' अत्र कुर्वन्ति इति क्रियापदस्य कर्तृपदं किम् ?

क) व्यायामं ख) जनाः ग) न कोऽपि

**IV) अस्य गद्यांशस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।** **(१ अङ्कः)**

Sample Paper Prabhat Kids School, Akola

## खण्डः 'ख'

## (रचनात्मक कार्यम्)

**प्रश्न २ : स्व–दिनचर्यायाः वर्णनं कुर्वन् पितरं प्रति पत्रं मञ्जूषायाः सहायतया पूरयत।** **५ अङ्काः**

**(मञ्जूषा – षड्वादने, लिखामि, प्रणामाः, गृहकार्यम्, गृहम्)**

छात्रावासतः

देहरादूननगरतः

दिनांकः............

आदरणीयाः पितृचरणाः,

सादर (१) ...............।

अत्र कुशलं तत्रास्तु। अस्मिन् पत्रे मम दिनचर्या– विषये (२) .............। अहं प्रातः (३) ........... शयनात् उत्तिष्ठामि। स्नानादिकं विधाय सार्धसप्तवादने विद्यालयं गच्छामि। तत्र द्विवादन–पर्यन्तं पठामि। त्रिवादने (४) ........ आगच्छामि। सायं किञ्चित कालं क्रीडामि। अष्टवादने (५) ........... करोमि। दशवादने च शय्यां गच्छामि। एषा मम दिनचर्या।

भवताम् आज्ञाकारी पुत्रः,

सुनिलः।

**प्रश्न ३ : अधोलिखितं चित्रं दृष्ट्वा मञ्जूषा–प्रदत्त–पदानां सहायतया पञ्चवाक्यानि लिखत।** **५ अङ्काः**

**(मञ्जूषा – वृक्षाः, आम्रवृक्षः, एकः, बालिकाः, क्रीडन्ति, हरिणाः, पुष्पेषु, चरन्ति, चित्रपतङ्गः, उड्डयति, उपवनस्य, खगाः, सर्वत्र, हरितानि, तृणानि)**



**प्रश्न ४ : अधोलिखितान् संवादान् मञ्जूषायां प्रदत्तशब्दैः पूरयत।** **५ अङ्काः**

**(मञ्जूषा – स्वास्थाय, भोजनम्, बुभुक्षिता, पिबामि, मह्यम्)**

| | | |
|---|---|---|
| **मुग्धा** | – | मातः! अहं १) ____________ अस्मि। |
| **माता** | – | यावत् त्वं एतत् दुग्धं पिबसि तावत् अहम् २) ____________ पचामि। |
| **मुग्धा** | – | मातः! ३) ____________ दुग्धं न रोचते। |
| | | अहम् दुग्धं न ४) ____________ । |
| **माता** | – | मुग्धे! ५) ____________ दुग्धम् आवश्यकम् भवति |
| **मुग्धा** | – | अस्तु वदति चेत् पिबामि। |

Sample Paper Prabhat Kids School, Akola

## खण्डः 'ग'

### (व्याकरणम्)

**प्रश्न ५ : सन्धि विच्छेदं पूरयत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

१) स्वोदरपूर्तिः – ............... + उदरपूर्तिः

२) कार्यार्थम् – ................ + अर्थम्

३) अप्येवम् – अपि + ................

४) ग्रामं प्रति – ग्रामम् + .............

५) करिष्यत्येषा – करिष्यति + ...............

**प्रश्न ६ : अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

१) कन्याः –
क) प्रथमा    ख) द्वितीया    ग) चतुर्थी

२) नागरिकैः –
क) तृतीया    ख) षष्ठी    ग) सप्तमी

३) सभायाम् –
क) द्वितीया    ख) सप्तमी    ग) प्रथमा

४) पिता –
क) प्रथमा    ख) द्वितीया    ग) चतुर्थी

५) वर्णानाम् –
क) षष्ठी    ख) तृतीया    ग) पञ्चमी

Sample Paper
Prabhat Kids School, Akola

**प्रश्न ७ : मञ्जूषातः क्रियापदं चित्वा वाक्यानि पूरयत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

**(मञ्जूषा – उड्डीयते, अभिनन्दति, प्रतिवसति स्म, इच्छामि, भक्षयिष्यामि)**

१) यः हितकामानां सुहृदां वाक्यं न ................।    २) एकः कूर्मः अपि तत्रैव ..............।

३) वयं गृहं नीत्वा कूर्मं ................।    ४) हंसाभ्यां सह कूर्मोऽपि ...............।

५) अहं आकाशमार्गेण अन्यत्र गन्तुम् .............।

**प्रश्न ८ : मञ्जूषातः अङ्कानां कृते पदानि चिनुत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्काः**

**(मञ्जूषा – षोड्श, अष्टाविंशतिः, त्रयस्त्रिंशत्, पञ्चचत्वारिशत्, षट्पञ्चाशत्)**

१) २८ –    २) ४५ –    ३) १६ –

४) ३३ –    ५) ५६ –

**प्रश्न ९ : मञ्जूषात: अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नपञ्चकम्) ५ अङ्का:**

**(मञ्जूषा – तथा, न, कदाचन, सदा, च, अपि)**

१) ............... कुशली भवान् ?

२) लता मेधा ......... विद्यालयं गच्छत:।

३) प्रियं .............. सत्यं वदेत्।

४) महात्मागान्धी ............ अहिंसां न अत्यजत्।

५) भक्त: ............... ईश्वरं स्मरति।

६) असत्यं .............. वक्तव्यम्।

**प्रश्न १० : अधोलिखितान् समयवाचकान् अङ्कान् पदेषु लिखत। (केवलं प्रश्नचतुष्टयम्) ४ अङ्का:**

१) ३.३० – २) ११.०० – ३) ७.०० –

४) १.३० – ५) ९.०० –

**खण्ड: 'घ'**

**(पठित अवबोधनम्)**

**प्रश्न ११ : अधोलिखितं गद्यांशं पठित्वा उत्तराणि लिखत। ५ अङ्का:**

अस्ति मगधदेशे फुल्लोत्पलनाम सर:। तत्र संकटविकटौ हंसौ निवसत:। कम्बुग्रीवनामक: तयो: मित्रम् एक: कूर्म: अपि तत्रैव प्रतिवसति स्म।

अथ एकदा धीवरा: तत्र आगच्छन्। ते अकथयन् – "वयं श्व: मत्स्यकूर्मादीन् मारयिष्याम:।" एतत् श्रुत्वा कूर्म: अवदत् – "मित्रे! किं युवाभ्यां धीवराणां वार्ता श्रुता ? अधुना किम् अहं करोमि ?" हंसौ अवदताम् – "प्रात: यद् उचितं तत्कर्त्तव्यम्।" कूर्म: अवदत् – "मैवम्। तद् यथाऽहम् अन्यं ह्रदं गच्छामि तथा कुरुतम्।" हंसौ अवदताम् – आवां किं करवाव ? कूर्म: अवदत् – "अहं युवाभ्यां सह आकशमार्गेण अन्यत्र गन्तुम् इच्छामि।"

हंसौ अवदताम् – "अत्र क: उपाय: ?" कच्छप: वदति – "युवां काष्ठदण्डम् एकं चञ्च्वा धारयताम्। अहं काष्ठदण्डमध्ये अवलम्ब्य युवयो: पक्षबलेन सुखेन गमिष्यामि।" हंसौ अकथयताम् – सम्भवति एष: उपाय:। किन्तु अत्र एक: अपायोऽपि वर्तते। आवाभ्यां नीयमानं त्वामवलोक्य जना: किञ्चिद् वदिष्यन्ति एव। यदि त्वमुत्तरं दास्यसि तदा तव मरणं निश्चितम्।

**I) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) (१ अङ्क:)**

१) संकटविकटौ कौ स्त: ?

२) फुल्लोत्पलनाम सर: कुत्र अस्ति ?

३) कूर्मस्य नाम किम् आसीत् ?

**II) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्) (२ अङ्का:)**

१) कूर्म: केन मार्गेण अन्यत्र गन्तुम् इच्छति ?

२) कच्छप: किं वदति ?

Sample Paper Prabhat Kids School, Akola

III) **निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **(२ अङ्का:)**

१) 'अकथयन्' इत्यत्र लकार: क: ?

क) लट्लकार: ख) लङ्लकार: ग) लृट्लकार:

२) 'हंसौ' इत्यस्मिन् पदे किं वचनम् ?

क) एकवचन ख) द्विवचनम् ग) बहुवचनम्

३) 'सायं' इति पदस्य विलोमपदं अनुच्छेदात् चित्वा लिखत।

क) प्रात: ख) श्व: ग) अद्य

**प्रश्न १२ : अधोलिखितं पद्यांशं पठित्वा उत्तराणि लिखत।** **५ अङ्का:**

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु:।
नास्ति उद्यमसमो बन्धु: कृत्वा यं नावसदिति।।
श्व: कार्यमद्य कुर्वीत पूर्वान्हे चापराण्हिकम्।
नहि प्रतीक्षते मृत्यु: कृतमस्य न वा कृतम्।।

**प्रश्ना:**

I) **एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(१ अङ्क:)**

१) केन समो बन्धु: नास्ति ?

२) क: न प्रतीक्षते ?

३) मनुष्याणां शरीरस्थो महान् रिपु: किं अस्ति ?

II) **पूर्णवाक्येन उत्तरत। (केवलं प्रश्नैकम्)** **(२ अङ्का:)**

१) श्व: कार्यं कदा कुर्वीत ?

२) आलस्यं केषां शरीरस्थो महान् रिपु: ?

III) **निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **(२ अङ्का:)**

१) 'महान् रिपु:' अनयो: विशेषणपदं किम् ?

क) महान् ख) रिपु: ग) न कोऽपि

२) 'कृतमस्य' इति पदे का विभक्ति: ?

क) द्वितीया ख) षष्ठी ग) प्रथमा

३) 'श्व:' इति पदस्य विलोमपदं किम् ?

क) अद्य ख) अत्र ग) तत्र

**प्रश्न १३ : रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

१) व्यवहारे मृदुता श्रेयसी।

२) शिव: स्मशाने वसति।

३) शत्रूणां समक्षं विजय: सुनिश्चित: भवेत्।

४) दर्शना तस्या: पुत्री च मिलित्वा परिवारस्य भरणपोषणं कुरुत: सम।

Sample Paper
Prabhat Kids School, Akola

५) <u>सत्येन</u> वाति वायुः।

**प्रश्न १४ : अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत।** **४ अङ्का:**

१) रमाबाई महोदयाया: विपिनबिहारीदासेन सह विवाह: अभवत्।

२) १८५८ तमे ख्रिष्टाब्दे रमाबाई जन्म अलभत।

३) सा उच्चशिक्षार्थम् इंग्लैण्डदेशं गतवती।

४) १९२२ तमे ख्रिष्टाब्दे रमाबाई – महोदयाया: निधनम् अभवत्।

५) सा मुम्बईनगरे शारदा – सदनम् अस्थापयत्।

६) सा स्वामतु: संस्कृतशिक्षां प्राप्तवती।

७) भ्रमणक्रमे सा कोलकातां प्राप्ता।

८) कालक्रमेण रमाया: पिता विपन्न: सञ्जात:।

**प्रश्न १५ : समुचितमेलनं कृत्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

| **क** | | **ख** |
|---|---|---|
| १) केशरवर्ण: | (   ) | क) प्रगते: न्यायस्य च प्रवर्तकम्। |
| २) अशोक चक्रम् | (   ) | ख) २२ जुलाई १९४७ तमे वर्षे जातम्। |
| ३) त्रिवर्ण: ध्वज: | (   ) | ग) शौर्यस्य त्यागस्य च सूचक:। |
| ४) हरितवर्ण: | (   ) | घ) स्वाधीनताया: राष्ट्रगौरवस्य च प्रतीक:। |
| ५) त्रीवर्णध्वजस्यस्वीकारणं | (   ) | ग) सुषमाया: उर्वरताया: च सूचक:। |

**प्रश्न १६ : अधोलिखितावाक्यानि क: कं प्रति कथयति इति लिखत। (केवलं प्रश्नचतुष्टयम्)** **४ अङ्का:**

| | **क: कथयति** | **कं प्रति कथयति** |
|---|---|---|
| १) अत्र क: उपाय:। | ............... | ............... |
| २) अहं तप: एव चरिष्यामि। | ............... | ............... |
| ३) अहं तव क्रीतदासोऽस्मि। | ............... | ............... |
| ४) यूयं भस्म खादत। | ............... | ............... |
| ५) अहम् उत्तरं न दास्यामि। | ............... | ............... |

**प्रश्न १७ : मञ्जूषात: पदानि चित्वा समानार्थकानि पदानि लिखत। (केवलं प्रश्नचतुष्टयम्)** **२ अङ्का:**

**(मञ्जूषा – प्रस्तरे, नयनानि, विस्मयेन, पठनस्य, समय:)**

१) आश्चर्येण –  २) नेत्राणि –  ३) शिलायां –

४) काल: –  ५) अध्ययनस्य –

**प्रश्न १८ : विलोमपदानि मेलयत। (केवलं प्रश्नचतुष्टयम्)** **२ अङ्का:**

| **क** | | **ख** |
|---|---|---|
| १) समीपस्थम् | (   ) | क) ह्य: |
| २) ग्रामम् | (   ) | ख) कथयति |
| ३) क्रेतुम् | (   ) | ग) दूरस्थम् |
| ४) श्व: | (   ) | घ) विक्रेतुम् |
| ५) पृच्छति | (   ) | ग) नगरम् |

Sample Paper
Prabhat Kids School, Akola